# Rishikashyapaproktam Shivaprasadapatratalakshanam

# ઋષિકશ્યપપ્રોક્તં શિવપ્રસાદપાત્રતાલક્ષણમ્

## Document Information

Text title : Rishikashyapaproktam Shivaprasadapatratalakshanam

File name : RRiShikashyapaproktaMshivaprasAdapAtratAlakShaNam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhImAkhyaH aShTamAMshaH | adhyAyaH 14-15 | vAvRittashlokAH ||

Latest update : July 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 5, 2024

*sanskritdocuments.org*

# ઋષિકશ્યપપ્રોક્તં શિવપ્રસાદપાત્રતાલક્ષણમ્

(શિવરહસ્યાન્તર્ગતે ભીમાખ્યે)
કાશ્યપ ઉવાચ ।
શિવપ્રસાદ યોગ્યં હિ પાત્રં શ્રીશામ્ભઃ સ્વયમ્ ।
(શિવપ્રસાદજં પાત્રં શ્રીશામ્ભવઃ કેવલં ભવે ।)
શામ્ભવા શમ્ભુભક્તા યે ભસ્મરુદ્રાક્ષધારિણઃ ॥ ૧૪.૧॥

શિવલિઙ્ગાર્ચકાઃ શૈવાઃ શિવૈકપરદેવતાઃ ।
શિવલિઙ્ગૈકશરણા મરણેઽપિ પ્રતિક્ષણમ્ ॥ ૧૪.૨॥

નાન્યે સુરાર્ચનરતાઃ શામ્ભવા એવ કેવલમ્ ।
શિવૈકશરણા એવ મનોવાક્કાયકર્મભિઃ ॥ ૧૪.૩॥

શામ્ભવા ન વિધાતારં ન વિષ્ણું નામરાન્પરાન્ ।
મનસાપિ ન મન્યન્તે મન્યન્તે તૃણતુલ્યતામ્ ॥ ૧૪.૪॥

શિવભક્તિસમાપન્નાઃ સમ્પન્ના એવ તે સદા ।
દુર્લભા શામ્ભવી ભક્તિઃ પ્રસાદાદેવ સા ભવેત્ ॥ ૧૪.૫॥

પ્રસાદઃ શાઙ્કરઃ શ્રેષ્ઠો ભવિષ્યતિ શિવાજ્ઞયા ।
ભાવાનાં ભાવનાં દૃષ્ટ્વા ભવઃ પ્રીતો ભવિષ્યતિ ॥ ૧૪.૬॥

નો ભાવો વિદ્યતે તસ્ય સદા સંસારવર્તિનામ્ ।
સંસારોત્તારકા એવ શામ્ભવાઃ શઙ્કરાજ્ઞયા ॥ ૧૪.૭॥

વિષ્ણુબ્રહ્માદયો દેવા મુનયો મનવસ્તથા ।
અસુરાઃ કિન્નરા વાપિ સુધાકરધરાર્ચકાઃ ॥ ૧૪.૮॥

તે સર્વે શામ્ભવા એવ ભસ્મરુદ્રાક્ષધારિણઃ ।
શિવૈકપરદેવાસ્તે તે સર્વે શિવચેતસઃ ॥ ૧૪.૯॥

શિવપ્રણામપરમા ભક્તા મુક્તિપથે સ્થિતાઃ ।

પઞ્ચાક્ષરપરા એવ શ્રીરુદ્રાધ્યાયજાપકાઃ ॥ ૧૪.૧૦॥

શિવલિઙ્ગાર્ચકાઃ શૈવાઃ સતતં ભવપૂજકાઃ ।
ભાવેન ભગવત્પ્રીતા ભવોદ્ભવપદાર્ચકાઃ ॥ ૧૪.૧૧॥

ભગવાન્ભવ એવેતિ યે વિજ્ઞાયાર્ચયન્તિ તે ।
ત્રિપુણ્ડ્રભસ્મનિટિલાઃ સદાબિલ્વાદિપલ્લવૈઃ ॥ ૧૪.૧૨॥

અભિષિચ્ય સદા નીરૈઃ સાયં પ્રાતર્વિશેષતઃ ।
પ્રદોષે સોમવારે ચ ચતુર્દશ્યષ્ટમીષુ ચ ॥ ૧૪.૧૩॥

નક્તં નૈવેદ્યભોક્તારો નિયમાચ્છઙ્કરાર્ચકાઃ ।
નિત્યં પ્રદોષનિયતા મિતાહારાઃ શિવાર્ચકાઃ ॥ ૧૪.૧૪॥

ભક્તાઃ શૈવા દ્વિજા એવમન્યે વર્ણા અપિ ક્રમાત્ ।
સ્ત્રિયો વા સઙ્કરા વાપિ પૂજ્ય લિઙ્ગં પિનાકિનઃ ॥ ૧૪.૧૫॥

શાઙ્કરા એવ તે સર્વે શિવલિઙ્ગાર્ચનોદ્યતાઃ ।
પઞ્ચાસ્યલિઙ્ગં પઞ્ચાસ્ય ધ્યાનપૂર્વં યજન્તિ તે ॥ ૧૪.૧૬॥

બિલ્વામ્બુજૈઃ સમભ્યર્ચ્ય પ્રાતઃ સાયં વિશેષતઃ ।
હારા દારિતપાપૌઘા અમોઘાઃ શઙ્કરાર્ચકાઃ ॥ ૧૪.૧૭॥

પઞ્ચાક્ષરેણ યો લિઙ્ગં બિલ્વૈરભ્યર્ચ્ય શૂલિનઃ ।
પઞ્ચેન્દ્રિયકૃતૈઃ પાપૈઃ પઞ્ચપાપૈશ્ચ મુચ્યતે ॥ ૧૪.૧૮॥

શમ્ભવા એવ સમ્પૂજ્યાઃ શિવાર્ચન પરાયણાઃ ।
અનભ્યર્ચ્ય મહાદેવં મરણેઽપિ પ્રતિક્ષણમ્ ॥ ૧૪.૧૯॥

નાન્યત્ફલં ચ ગૃહ્ણન્તિ નિયમામિતભાષિણઃ ।
ત એવ સાઙ્ગા વિજ્ઞેયાઃ શિવલિઙ્ગૈકપૂજકાઃ ॥ ૧૪.૨૦॥

તદઙ્ગસઙ્ગતઃ સદ્યઃ પાપભઙ્ગઃ પ્રજાયતે ।
માતઙ્ગકૃત્તિવસન પાદપૂજાપ્રભાવતઃ ॥ ૧૪.૨૧॥

તેષુ દત્તં તથા શમ્ભુઃ સ્વયં ગૃહ્ણાતિ શઙ્કરઃ ।
શિવક્ષેત્રૈ ભોજનીયાઃ પૂજ્યાશ્ચ શિવયોગિનઃ ॥ ૧૪.૨૨॥

અન્યવર્ણેષ્વપિ તથા ભસ્મરુદ્રાક્ષધારિણઃ ।
શિવલિઙ્ગાસક્તકણ્ઠા નીલકણ્ઠપદાર્ચકાઃ ॥ ૧૪.૨૩॥

અવિમુક્તે ચ કેદારે રુદ્રકોટૌ મરેશ્વરે ।
ભૃગુતુન્દે નર્મદાયાં ઓઙ્કારે ચ પ્રભાસકે ॥ ૧૪.૨૪॥

પુષ્કરે નૈમિશારણ્યે મહાકાલે ત્રિયમ્બકે ।
ગોકર્ણે ચ કુરુક્ષેત્રે શ્રીશૈલે પુણ્ડરીકકે ॥ ૧૪.૨૫॥

દક્ષિણે તત્ર કૈલાસે વૃદ્ધાદ્રાવરુણાચલે ।
ગોપર્વતે સહ્યમૂલે શ્રીકણ્ઠે રત્નપર્વતે ॥ ૧૪.૨૬॥

શ્રીમાતૃશિખરે ચૈવ ગજારણ્યેઽથ જાપ્યકે ।
કુમ્ભઘોણેઽર્જુને ચૈવ માયૂરે શ્વેતકાનને ॥ ૧૪.૨૭॥

કમલાલયસંજ્ઞે ચ વેદારણ્યોરુસેતુકે ।
હાલાસ્ય વેણુવિપિને તામ્રપર્ણ્યાસ્તટદ્વયે ॥ ૧૪.૨૮॥

સહ્યાપગારોધસી ચ ક્ષેત્રનિષ્ઠાશ્ચ શામ્ભવાઃ ।
પૂજનીયાઃ પ્રયત્નેન શિવપ્રીત્યર્થમેવ હિ ॥ ૧૪.૨૯॥

યત્ર ભુઙ્ક્તે શામ્ભવસ્તુ શિવો ભુઙ્ક્તે ચ તત્ર હિ ।
પૂજ્યાઃ સદા દાનમાનૈસ્તેન પ્રીતો ભવેચ્છિવઃ ॥ ૧૪.૩૦॥

શિવભક્તા મહોત્સાહાઃ શિવાર્ચનપરાયણાઃ ।
શાન્તા દાન્તા જિતક્રોધાઃ શિવનામજપાદરાઃ ॥ ૧૪.૩૧॥

ભસ્મરુદ્રાક્ષસમ્પન્નાઃ શિવોત્કર્ષૈકવાદિનઃ ।
વેદિનો હરતત્વસ્ય શિવક્ષેત્રનિવાસિનઃ ॥ ૧૪.૩૨॥

અન્યક્ષેત્રપ્રત્યભિજ્ઞારહિતા ભૂતિભાવિનઃ ।
શિવમેવ યજન્ત્યેવ સર્વકાર્યેષુ સાદરમ્ ॥ ૧૪.૩૩॥

ત એવ વૈદિકા જ્ઞેયાઃ શ્રૌતપુણ્ડ્રાદિધારિણઃ ।
શ્રૌતલિઙ્ગમિદં પ્રોક્તં ભસ્મરુદ્રાક્ષધારણમ્ ॥ ૧૪.૩૪॥

રુદ્રાધ્યાયજપઃ શ્રૌતઃ શ્રૌતઃ પઞ્ચાક્ષરીજપઃ ।
રુદ્રાલિઙ્ગાર્ચનં શ્રૌતં શ્રૌતી શિજપસ્મૃતિઃ ॥ ૧૪.૩૫॥

શ્રૌતધર્માર્થનિરતાઃ શામ્ભવા એવ કેવલમ્ ।
અશ્રૌતમૂર્ધ્વપુણ્ડ્રં તુ નૈવ ધાર્યં શિવાર્ચકૈઃ ॥ ૧૪.૩૬॥

નાન્યક્ષેત્રે વસેન્નિત્યં શામ્ભવઃ શમ્ભુતત્પરઃ ।
નાન્યં સુરં વાપિ નરં કિન્નરં વા ભજેત્સ હિ ॥ ૧૪.૩૭॥

એવં યે શિવભક્તિભાવનિરતાસ્તે શામ્ભવાઃ કેવલં
દારોદારકુમારવૃન્દસહિતાઃ શ્રીશઙ્કરાર્ચારતાઃ ।
મારાપારશરાભિઘાતરહિતા વેદાન્તસારાદરા
મોહાપારમહાઘસંસૃતિભરં હારાસ્ત્યજન્ત્યેવ તે ॥ ૧૪.૩૮॥

શાઙ્કરા એવ દેવેશં સ્તુવન્તિ ભવભાવિતાઃ ।
ભાવનામાત્રસુલભો દુર્લભો હ્યકૃતાત્મનામ્ ॥ ૧૫.૧॥

શિવ એવ હિ સર્વેષાં શાસકસ્તારકઃ સતામ્ ।
સ એવ ભક્તિભાવેન પૂજિતો ભુક્તિમુક્તિદઃ ॥ ૧૫.૨॥

શિવનૈવેદ્યતુષ્ટાઙ્ગાઃ સન્તુષ્ટા જ્યેષ્ઠપૂજકાઃ ।
નિષ્ઠાવન્તઃ કૃપાવન્તઃ શિપિવિષ્ટપદાશ્રયાઃ ॥ ૧૫.૩॥

તુષ્ટાઃ પુષ્ટાઃ સદા ભક્તાસ્તેજિષ્ઠાઃ શિવપૂજકાઃ ।
સ્તુવન્તિ સ્તોત્રવર્યેણ નૃત્યન્ત્યુગ્રાગ્રતો મુદા ॥ ૧૫.૪॥

ભસ્મરુદ્રાક્ષકવચા જટામકુટભૂષણાઃ ।
રુદ્રાક્ષવરકોટીરા રુદ્રાક્ષાઙ્ગદકઙ્કણાઃ ॥ ૧૫.૫॥

સાશ્રુનેત્રાઃ સ્ખલજ્જિહ્વાસ્તે નૃત્યન્તિ શિવાગ્રતઃ ।
સોત્સાહકરતાળૈશ્ચ શામ્ભાઃ લિઙ્ગપ્રપૂજકાઃ ॥ ૧૫.૬॥

શિવલિઙ્ગપ્રભાસઙ્ગકૃપાપાઙ્ગાવલોકકાઃ ।
અનઙ્ગવરમાતઙ્ગભઙ્ગસઙ્ગાન્તરઙ્ગકાઃ ॥ ૧૫.૭॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋષિકશ્યપપ્રોક્તં શિવપ્રસાદપાત્રતાલક્ષણં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભીમાખ્યઃ અષ્ટમાંશઃ । અધ્યાયઃ ૧૪-૧૫ । વાવૃત્તશ્લોકાઃ ॥

- .. shrIshivarahasyam . bhImAkhyaH aShTamAMshaH . adhyAyaH 14-15 . vAvRRittashlokAH ..

Notes:

Ṛṣi Kaśyapa ઋષિ કશ્યપ speaks about indicators and significations of Grace of Śiva શિવ.

Proofread by Ruma Dewan

*Rishikashyapaproktam Shivaprasadapatratalakshanam*

pdf was typeset on July 5, 2024

Please send corrections to *sanskrit@cheerful.com*